# ললিতা স্তবরাজঃ ব্রহ্মাণ্ডমহাপুরাণে

{॥ ললিতা স্তবরাজঃ ব্রহ্মাণ্ডমহাপুরাণে ॥}

দেবা ঊচুঃ

জয দেবি জগন্মাতর্জয দেবি পরাৎপরে ।

জয কল্যাণনিলযে জয কামকলাত্মিকে ॥ ৩.১৩.১॥

জযকারি চ বামাক্ষি জয কামাক্ষি সুন্দরি ।

জযাখিলসুরারাধ্যে জয কামেশি মানদে ॥ ৩.১৩.২॥

জয ব্রহ্মমযে দেবি ব্রহ্মাত্মকরসাত্মিকে ।

জয নারাযণি পরে নন্দিতাশেষবিষ্টপে ॥ ৩.১৩.৩॥

জয শ্রীকণ্ঠদযিতে জয শ্রীললিতেঽম্বিকে ।

জয শ্রীবিজযে দেবি বিজযশ্রীসমৃদ্ধিদে ॥ ৩.১৩.৪॥

জাতস্য জাযমানস্য ইষ্টাপূর্তস্য হেতবে ।

নমস্তস্যৈ ত্রিজগতাং পালযিত্র্যৈ পরাৎপরে ॥ ৩.১৩.৫॥

কলামুহূর্তকাষ্ঠাহর্মাসর্তুশরদাত্মনে ।

নমঃ সহস্রশীর্ষাযৈ সহস্রমুখলোচনে ॥ ৩.১৩.৬॥

নমঃ সহস্রহস্তাব্জপাদপঙ্কজশোভিতে ।

অণোরণুতরে দেবি মহতোঽপি মহীযসি ॥ ৩.১৩.৭॥

পরাৎপরতরে মাতস্তেজস্তেজীযসামপি ।

অতলং তু ভবেৎপাদৌ বিতলং জানুনী তব ॥ ৩.১৩.৮॥

রসাতলং কটীদেশঃ কুক্ষিস্তে ধরণী ভবেত্ ।

হৃদযং তু ভুবর্লোকঃ স্বস্তে মুখমুদাহৃতম্ ॥ ৩.১৩.৯॥

দৃশশ্চন্দ্রার্কদহনা দিশস্তে বাহবোঽম্বিকে ।

মরুতস্তু তবোচ্ছ্বাসা বাচস্তে শ্রুতযোঽখিলাঃ ॥ ৩.১৩.১০॥

ক্রীডা তে লোকরচনা সখা তে চিন্ময়ঃ শিবঃ ।

আহারস্তে সদানন্দো বাসস্তে হৃদযে সতাম্ ॥ ৩.১৩.১১॥

দৃশ্যাদৃশ্যস্বরূপাণি রূপাণি ভুবনানি তে ।

শিরোরুহা ঘনাস্তে তু তারকাঃ কুসুমানি তে ॥ ৩.১৩.১২॥

ধর্মাদ্যা বাহবস্তে স্যুরধর্মাদ্যাযুধানি তে ।

যমাশ্চ নিযমাশ্চৈব করপাদরুহাস্তথা ॥ ৩.১৩.১৩॥

স্তনৌ স্বাহাস্বধাঽঽকরৌ লোকোজ্জীবনকারকৌ ।

প্রাণাযামস্তু তে নাসা রসনা তে সরস্বতী ॥ ৩.১৩.১৪॥

প্রত্যাহারস্ত্বিন্দ্রিযাণি ধ্যানং তে ধীস্তু সত্তমা ।

মনস্তে ধারণাশক্তির্হৃদযং তে সমাধিকঃ ॥ ৩.১৩.১৫॥

মহীরুহাস্তেঽঙ্গরুহাঃ প্রভাতং বসনং তব ।

ভূতং ভব্যং ভবিষ্যচ্চ নিত্যং চ তব বিগ্রহঃ ॥ ৩.১৩.১৬॥

যজ্ঞরূপা জগদ্ধাত্রী বিশ্বরূপা চ পাবনী ।

আদৌ যা তু দযাভূতা সসর্জ নিখিলাঃ প্রজাঃ ॥ ৩.১৩.১৭॥

হৃদযস্থাপি লোকানামদৃশ্যা মোহনাত্মিকা ॥ ৩.১৩.১৮॥

নামরূপবিভাগং চ যা করোতি স্বলীলযা ।

তান্যধিষ্ঠায তিষ্ঠন্তী তেষ্বসক্তার্থকামদা ।

নমস্তস্যৈ মহাদেব্যৈ সর্বশক্ত্যৈ নমোনমঃ ॥ ৩.১৩.১৯॥

যদাজ্ঞযা প্রবর্তন্তে বহ্নিসূর্যেন্দুমারুতাঃ ।

পৃথিব্যাদীনি ভূতানি তস্যৈ দেব্যৈ নমোনমঃ ॥ ৩.১৩.২০॥

যা সসর্জাদিধাতারং সর্গাদাবাদিভূরিদম্ ।

দধার স্বযমেবৈকা তস্যৈ দেব্যৈ নমোনমঃ ॥ ৩.১৩.২১॥

যথা ধৃতা তু ধরণী যযাঽঽকাশমমেযযা ।

যস্যামুদেতি সবিতা তস্যৈ দেব্যৈ নমোনমঃ ॥ ৩.১৩.২২॥

যত্রোদেতি জগৎকৃৎস্নং যত্র তিষ্ঠতি নির্ভরম্ ।

যত্রান্তমেতি কালে তু তস্যৈ দেব্যৈ নমোনমঃ ॥ ৩.১৩.২৩॥

নমোনমস্তে রজসে ভবাযৈ নমোনমঃ সাত্ত্বিকসংস্থিতাযৈ ।

নমোনমস্তে তমসে হরাযৈ নমোনমো নির্গুণতঃ শিবাযৈ ॥ ৩.১৩.২৪॥

নমোনমস্তে জগদেকমাত্রে নমোনমস্তে জগদেকপিত্রে ।

নমোনমস্তেঽখিলরূপতন্ত্রে নমোনমস্তেঽখিলযন্ত্ররূপে ॥ ৩.১৩.২৫॥

নমোনমো লোকগুরুপ্রধানে নমোনমস্তেঽখিলবাগ্বিভূত্যৈ ।

নমোঽস্তু লক্ষ্ম্যৈ জগদেকতুষ্ট্যৈ নমোনমঃ শাংভবি সর্বশক্ত্যৈ ॥ ৩.১৩.২৬॥

অনাদিমধ্যান্তমপাঞ্চভৌতিকং হ্যবাঙ্মনোগম্যমতর্ক্যবৈভবম্ ।

অরূপমদ্বন্দ্বমদৃষ্টগোচরং প্রভাবমগ্র্যং কথমংব বর্ণযে ॥ ৩.১৩.২৭॥

প্রসীদ বিশ্বেশ্বরি বিশ্ববন্দিতে প্রসীদ বিদ্যেশ্বরি বেদরূপিণি ।

প্রসীদ মাযামযি মন্ত্রাবিগ্রহে প্রসীদ সর্বেশ্বরি সর্বরূপিণি ॥ ৩.১৩.২৮॥

ইতি স্তুত্বা মহাদেবীং দেবাঃ সর্বে সবাসবাঃ ।

ভূযো ভূযো নমস্কৃত্য শরণং জগ্মুরঞ্জসা ॥ ৩.১৩.২৯॥

ততঃ প্রসন্না সা দেবী প্রণতং বীক্ষ্য বাসবম্ ।

বরেণ চ্ছন্দযামাস বরদাখিলদেহিনাম্ ॥ ৩.১৩.৩০॥

ইন্দ্র উবাচ

যদি তুষ্টাসি কল্যাণি বরং দৈত্যেন্দ্রপীডিতাঃ ।

দুর্ধরং জীবিতং দেহি ত্বাং গতাঃ শরণার্থিনঃ ॥ ৩.১৩.৩১॥

শ্রীদেব্যুবাচ

অহমেব বিনির্জিত্য ভণ্ডং দৈত্যকুলোদ্ভবম্ ।

অচিরাত্তব দাস্যামি ত্রৈলোক্যং সচরাচরম্ ॥ ৩.১৩.৩২॥

নির্ভযা মুদিতাঃ সন্তু সর্বে দেবগণাস্তথা ।

যে স্তোষ্যন্তি চ মাং ভক্ত্যা স্তবেনানেন মানবাঃ ॥ ৩.১৩.৩৩॥

ভাজনং তে ভবিষ্যন্তি ধর্মশ্রীযশসাং সদা ।

বিদ্যাবিনযসম্পন্না নীরোগা দীর্ঘজীবিনঃ ॥ ৩.১৩.৩৪॥

পুত্রমিত্রকলত্রাঢ্যা ভবন্তু মদনুগ্রহাত্ ।

ইতি লব্ধবরা দেবা দেবেন্দ্রোঽপি মহাবলঃ ॥ ৩.১৩.৩৫॥

আমোদং পরমং জগ্মুস্তাং বিলোক্য মুহুর্মুহুঃ ॥ ৩.১৩.৩৬॥

ইতি শ্রীব্রহ্মাণ্ডমহাপুরাণে উত্তরভাগে হয়গ্রীবাগস্ত্যসংবাদে ললিতোপাখ্যানে

ললিতাস্তবরাজো নাম ত্রয়োদশোঽধ্যায়ঃ ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Lalita Stavarajam Lyrics in Bengali PDF
% File name : lalitAstavarAjabrahmANDa.itx
% Category : stavarAja
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : PSA Easwaran psaeaswaran at gmail.com
% Proofread by : PSA Easwaran psaeaswaran at gmail.com
% Latest update : December 14, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ October 13, 2015 ] at Stotram Website